याति विक्रयात्। मद्यतक्रपयोदध्नां स प्रेतो जायते नरः। स्त्रीरक्तो मद्यपाने तु मृगयामनुधावति। नित्यनैमित्तिकेऽदाता स प्रेतो जायते नरः” अग्निपु०। मनुष्याणाञ्च दाहादिक्रिययाऽतिवाहिकदेहानन्तरं प्रेतदेहो भवति यथाह विष्णुधर्मोत्तरे

“तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्। आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्। प्रेतपिण्डैस्ततो दत्तैर्देहमाप्नोति भार्गव!। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्। श्माशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते। तत्रास्य यातना घोराः शीतवातातपोद्भवाः। ततः सपिण्डीकरणे बान्धवैः स कृते नरः। पूर्णे संवत्सरे देहमतोऽन्यं प्रतिपद्यते। ततः स नरके याति स्वर्गे वा स्वेन कर्मणा” शु०त०। ५प्राप्तपितृलोके “अत ऊर्द्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात्” गोभिलः “प्रेतलोकं परित्यज्य आगता ये महालये” ति०त०।

**प्रेतकर्म्मन्** न० ६त०। १मृतोद्देशेन कर्त्तव्ये दाहादिसपिण्डनान्तकर्म्मणि मा०द्रौ०५२अ०। प्रेतकार्य्यादयोऽप्यत्र। २प्राप्तपितृलोकोद्देशककार्य्ये श्राद्धादौ च “अकृत्वा प्रेतकार्य्याणि प्रेतस्य धनहारकः। वर्णानां यद्वधे प्रोक्तं तद्व्रतं नियतश्चरेत्” दाय०त० वचनम्।

**प्रेतगृह** न० प्रेतस्य मृतस्य गृहमिव। मृतस्य शरीराधारे श्मशाने हेमच०। प्रेतावासादयोऽप्यत्र।

**प्रेततर्पण** न० ६त०। मृतोद्देशेन वर्षपर्य्यन्तं प्रेतशब्दोल्लेखेन कर्त्तव्ये तर्पणविशेषे तद्विधानं शु०ति० यथा

मिश्राचार्य्यपृथ्वीधरधृतविष्णुसूत्रम् “अतः सर्वे शवस्पर्शिनो गत्वा पितृपदस्थाने प्रेतपदोहेन द्वितीयान्तं तर्पयेयुः पितृशब्दोच्चारेण पितृहा भवति”। शातातपः “प्रेतान्तनामगोत्राभ्यामुत्सृजेदुपतिष्ठताम्” इति प्रेतान्तेति तत्पुरुषः न बहुव्रीहिः सर्वजघन्यत्वात् तेन प्रेतान्तनाम गोत्रञ्चेति समासः एतद्वचनाच्चितापिण्डदाने उपतिष्ठतामिति पितृदयितायामप्युक्तम्। एतेन प्रेतकार्यें सम्बन्धार्थकपदप्रयोगो मैथिलोक्तो हेयः। एतेनामुकगोत्रममुकदेवशर्माणं तर्पयामीति सामगानां प्रयोगः। अत्र प्रेततर्पणे सतिलांस्त्विति विशेषोपादानात् सूर्य्यादिवारेऽपि तिलैरेव तर्पणं प्रतीयते। अतएवाह मदनपारिजातधृता स्मृतिः “अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च। उपाकर्मणि चोत्सर्गे युगादौ मृतवासरे। सूर्य्यशुक्रादिवारे च न दोषस्तिलतर्पणे”। तथा “तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्वदा”। तिथिविशेषे अमावस्यादशहरादौ। अत्र दक्षिणाङ्गुष्ठसहितमध्यमादिना वामहस्ते तिलदानं “वामहस्ते तिलान् दत्त्वा जलमध्ये तु तर्पयेत्। मुक्तहस्तन्तु कर्त्तव्यं न मुद्रां तत्र दर्शयेत्” इति विद्याकरधृतवचने वामहस्त इति सप्तम्यन्तश्रवणात् “तिलान् संमिश्रयेज्जले” इति तिलाधिकरणस्योपक्रम्याभिधानाच्च। “सव्येन च तिलाः ग्राह्याः” इत्यत्रापि वामहस्ते स्थाप्या इत्यर्थः। सव्येनेति स्थाल्या पचतीतिवदधिकरणे तृतीया “विवक्षातो हि कारकाणि भवन्ती”त्युक्तेः। मुद्रा अङ्गुष्ठतर्जन्यात्मकयोगरूपा तिलग्रहणायेति शेषः”।

**प्रेतधूम** पु० ६त०। चिताधूमे मनुः ४।६९। [नदीभेदे शब्दच०।

**प्रेतनदी** स्त्री प्रेतगम्या नदी। यमद्वारस्थे वैतरणीनामके

**प्रेतनिर्हारक** पु० प्रेतं निर्हरति गृहात् श्मशानभूमिं निर+हृ-ण्वुल्। शवहारके “प्रेतनिर्हारकाश्चैव वर्जनीयाः प्रयत्नतः” तस्य अपाङ्क्तेयता मनुनोक्ता। तच्च कुल्लू० धनग्रहणपूर्वकहरणपरतया व्याख्यातं यथा “प्रेतनिर्हारको धनग्रहणेन न तु धर्मार्थम्। “एतद्वै परमन्तपो यत् प्रेतमरण्यं हरन्तीति” श्रुत्या विहितत्वात्”

**प्रेतपक्ष** पु० प्रेतानां पितॄणां प्रियः पक्षः शा०त०। गौणाश्विनकृष्णपक्षे अत्र मृतयोः पित्रोः पार्वणविधिना त्रैपुरुषिकं श्राद्धं करणीयं यथाह श्रा०त० शङ्खः

“सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्य्यात् वर्जयित्वा मृताहनि। अमावस्यां क्षयो यस्य प्रेतपक्षेऽथ वा पुनः। सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्वणो विधिः”। त्रयं सम्प्रदानानां त्रयं कुर्य्यात् त्रिभ्यो दद्यादित्यर्थः। मृताहपर्युदस्तनिर्देवतत्वस्य प्रतिप्रसवमाह अमावस्यामिति प्रेतपक्षोऽत्र पितृपक्षः आश्वयुककृष्णपक्ष इति यावत् न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वेऽमावास्यापदवैयर्थ्यापत्तेः पितृपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नागरखण्डम् “नभो वाऽथ नभस्यो वा मलमासो यदा भवेत्। सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः”। अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे आषाढापेक्षया सप्तमपक्षस्य पितृपक्षत्वात् अत्र मृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासभाद्रकृष्णपक्षे मृतस्य। ततश्च तत्र मृतस्य